કવચં રાઘવેંદ્રસ્ય યતીંદ્રસ્ય મહાત્મનઃ |
વક્ષ્યામિ ગુરુવર્યસ્ય વાંછિતાર્થપ્રદાયકમ || ૧ ||
ઋષિરસ્યાપ્પણાચાર્યઃ છંદોસ્નુષ્ટુપ પ્રકીર્તિતમ |
દેવતા શ્રીરાઘવેંદ્રગુરુરિર્થંસિદ્ધયે || ૨ ||
અષ્ટોત્તરશતં જપ્યં ભક્તિયુક્તેન ચેતસા |
ઉદ્યત્પ્રદ્યોતનદ્યોતભર્મકૂર્માસને સ્થિતમ || ૩ ||
એદ્યખદ્યોતનદ્યોતપ્રતાપં રામમાનસમ |
ધૃતકાષાયવસનં તુલસીહારવક્ષસમ || ૪ ||
દોર્દંડવિલસદ્દંડકમંડલુવિરાજિતમ |
અભય જ્ઞાનમુદ્રાક્ષમાલાશીલકરાંબુજમ || ૫ ||
યોગીંદ્રવંદ્યપાદાબ્જં રાઘવેંદ્રગુરું ભજે |
શિરો રક્ષતુ મે નિત્યં રાઘવેંદ્રોસ્ખિલેષ્ટદઃ || ૬ ||
પાપાદ્રિપાટને વજ્રઃ કેશાન રક્ષતુ મે સદા |
ક્ષમાસુરગણાધીશો મુખં રક્ષતુ મે ગુરુઃ || ૭ ||
હરિસેવાલબ્ધસર્વસંપત્ફાલં મમાવતુ |
દેવસ્વભાવોસ્વતુ મે દૃશૌ તત્ત પ્રદર્શકઃ || ૮ ||
ઇષ્ટપ્રદાને કલ્પદ્રુઃ શ્રોત્રે શ્રુત્યર્થબોધકઃ |
ભવ્યસ્વરૂપો મે નાસાં જિહ્વાં મેસ્વતુ ભવ્યકૃત || ૯ ||
આસ્યં રક્ષતુ મે દુઃખતૂલસંઘાગ્નિચર્યકઃ |

સુખધૈર્યાદિસુગુણો ભ્રુવૌ મમ સદાસ્વતુ || ૧૦ ||
ઓષ્ઠૌ રક્ષતુ મે સર્વગ્રહનિગ્રહશક્તિમાન |
ઉપપ્લવોદધેસ્સેતુર્દંતાન રક્ષતુ મે સદા || ૧૧ ||
નિરસ્તદોષો મે પાતુ કપોલૌ સર્વપાલકઃ |
નિરવદ્યમહાવેષઃ કંઠં મેસ્વતુ સર્વદા || ૧૨ ||
કર્ણમૂલે તુ પ્રત્યર્થિમૂકત્વાકરવાડ મમ |
બહુવાદિજયી પાતુ હસ્તૌ સત્તત્ત્વવાદકૃત || ૧૩ ||
કરૌ રક્ષતુ મે વિદ્વત્પરિજ્ઞેયવિશેષવાન |
વાગ્વૈખરીભવ્યશેષજયી વક્ષસ્થલં મમ || ૧૪ ||
સતીસંતાનસંપત્તિભક્તિ જ્ઞાનાદિવૃદ્ધિકૃત |
સ્તનૌ રક્ષતુ મે નિત્યં શરીરાવદ્યહાનિકૃત || ૧૫ ||
પુણ્યવર્ધનપાદાબ્જાભિષેકજલસંચયઃ |
નાભિં રક્ષતુ મે પા દ્યુનદીતુલ્યસદ્ગુણઃ || ૧૬ ||
પૃષ્ટં રક્ષતુ મે નિત્યં તાપત્રયવિનાશકૃત |
કટિં મે રક્ષતુ સદા વંધ્યાસત્પુત્રદાયકઃ || ૧૭ ||
જઘનં મેસ્વતુ સદા વ્યંગસ્વંગસમૃદ્ધિકૃત |
ગુહ્યં રક્ષતુ મે પાપગ્રહારિષ્ટવિનાશકૃત || ૧૮ ||
ભક્તાઘવિધ્વંસકરનિજમૂર્તિપ્રદર્શકઃ |
મૂર્તિમાન્પાતુ મે રોમં રાઘવેંદ્રો જગદ્ગુરુઃ || ૧૯ ||

સર્વતંત્રસ્વતંત્રોસ્સૌ જાનુની મે સદ્રાવતુ |
જંઘે રક્ષતુ મે નિત્યં શ્રીમધ્વમતવર્ધનઃ || ૨૦ ||
વિજયીંદ્રકરાબ્જોત્થસુધીંદ્રવરપુત્રકઃ |
ગુલ્ફૌ શ્રીરાઘવેંદ્રો મે યતિરાટ સર્વદાસ્વતુ || ૨૧ ||
પાદૌ રક્ષતુ મે સર્વભયહારી કૃપાનિધિઃ |
જ્ઞાનભક્તિસુપુત્રાયુર્યશઃ શ્રીપુણ્યવર્ધનઃ || ૨૨ ||
કરપાદાંગુલીઃ સર્વા મમાવતુ જગદ્ગુરુઃ |
પ્રતિવાદિજયસ્વાંતભેદચિહ્નાદરો ગુરુઃ || ૨૩ ||
નખાનવતુ મે સર્વાન સર્વશાસ્ત્રવિશારદઃ |
અપરોક્ષીકૃતશ્રીશઃ પ્રાચ્યાં દિશિ સદાસ્વતુ || ૨૪ ||
સ દક્ષિણે ચાવતુ માં સમુપેક્ષિતભાવજઃ |
અપેક્ષિતપ્રદાતા ચ પ્રતીચ્યામવતુ પ્રભુઃ || ૨૫ ||
દયાદાક્ષિણ્યવૈરાગ્યવાક્પાટવમુખાંકિતઃ |
સદોદીચ્યામવતુ માં શાપાનુગ્રહશક્તિમાન || ૨૬ ||
નિખિલેંદ્રિયદોષઘ્નો મહાનુગ્રહકૃદ્ગુરુઃ |
અધશ્ચોર્ધ્વં ચાવતુ મામષ્ટાક્ષરમનૂદિતમ || ૨૭ ||
આત્માત્મીયાઘરાશિઘ્નો માં રક્ષતુ વિદિક્ષુ ચ |
ચતુર્ણાં ચ પુમર્થાનાં દાતા પ્રાતઃ સદાસ્વતુ || ૨૮ ||
સંગમેવતુ માં નિત્યં તત્ત્વવિત્સર્વસૌખ્યકૃત |

www.yousigma.com

મધ્યાહ્નેઽગમ્યમહિમા માં રક્ષતુ મહાયશાઃ || ૨૯ ||
મૃતપોતપ્રાણદાતા સાયાહ્ને માં સદાસ્વતુ |
વેદિસ્થપુરુષોજ્જીવી નિશીથે પાતુ માં ગુરુઃ || ૩૦ ||
વહ્નિસ્થમાલિકોદ્ધર્તા વહ્નિતાપાત્સદાસ્વતુ |
સમગ્રટીકાવ્યાખ્યાતા ગુરુર્મે વિષયેસ્વતુ || ૩૧ ||
કાંતારેઁવતુ માં નિત્યં ભાઢ (ભાષ્ય) સંગ્રહકૃદ્ગુરુઃ |
સુધાપરિમળોદ્ધર્તા સુ (સ્વ)ચ્છંદસ્તુ સદાસ્વતુ || ૩૨ ||
રાજચોરવિષવ્યાધિયાદોવન્યમૃગાદિભિઃ |
અપસ્મારાપહર્તા નઃ શાસ્ત્રવિત્સર્વદાસ્વતુ || ૩૩ ||
ગતૌ સર્વત્ર માં પાતૂપનિષદર્થકૃદ્ગુરુઃ |
ઋગ્વ્યાખ્યાનકૃદાચાર્યઃ સ્થિતૌ રક્ષતુ માં સદા || ૩૪ ||
મંત્રાલયનિવાસી માં જાગ્રત્કાલે સદાસ્વતુ |
ન્યાયમુક્તાવલીકર્તા સ્વપ્ને રક્ષતુ માં સદા || ૩૫ ||
માં પાતુ ચંદ્રિકાવ્યાખ્યાકર્તા સુપ્તૌ હિ તત્ત કૃત |
સુતંત્રદીપિકાકર્તા મુક્તૌ રક્ષતુ માં ગુરુઃ || ૩૬ ||
ગીતાર્થસંગ્રહકરસ્સદા રક્ષતુ માં ગુરુઃ |
શ્રીમધ્વમતદુગ્ધાબ્ધિચંદ્રોસ્વતુ સદાસ્નઘઃ || ૩૭ ||
ઇતિ શ્રીરાઘવેંદ્રસ્ય કવચં પાપનાશનમ |
સર્વવ્યાધિહરં સદ્યઃ પાવનં પુણ્યવર્ધનમ || ૩૮ ||

ય ઇદં પઠતે નિત્યં નિયમેન સમાહિતઃ |
અદૃષ્ટિઃ પૂર્ણદૃષ્ટિઃ સ્યાદેડમૂકોસ્પિ વાક્પતિઃ || ૩૯ ||
પૂર્ણાયુઃ પૂર્ણસંપત્તિભક્તિ જ્ઞાનાભિવૃદ્ધિકૃત |
પીત્વા વારિ નરો યેન કવચેનાભિમંત્રિતમ || ૪૦ ||
જહાતિ કુક્ષિગાન રોગાન ગુરુવર્યપ્રસાદતઃ |
પ્રદક્ષિણનમસ્કારાન ગુરોર્વૃંદાવનસ્ય યઃ || ૪૧ ||
કરોતિ પરયા ભક્ત્યા તદેતત્કવચં પઠન |
પંગુઃ કૂણિશ્ચ પૌગંડઃ પૂર્ણાંગો જાયતે ધ્રુવમ || ૪૨ ||
શેષાશ્ચ કુષ્ઠપૂર્વાશ્ચ નશ્યંત્યામયરાશયઃ |
અષ્ટાક્ષરેણ મંત્રેણ સ્તોત્રેણ કવચેન ચ || ૪૩ ||
વૃંદાવને સન્નિહિતમભિષિચ્ય યથાવિધિ |
યંત્રે મંત્રાક્ષરાણ્યષ્ટૌ વિલિખ્યાત્ર પ્રતિષ્ઠિતમ || ૪૪ ||
ષોડશૈરુપચારૈશ્ચ સંપૂજ્ય ત્રિજગદ્ગુરુમ |
અષ્ટોત્તરશતાખ્યાભિરર્ચયેત્કુસુમાદિભિઃ || ૪૫ ||
ફલૈશ્ચ વિવિધૈરેવ ગુરોરર્ચાં પ્રકુર્વતઃ |
નામશ્રવણમાત્રેણ ગુરુવર્યપ્રસાદતઃ || ૪૬ ||
ભૂતપ્રેતપિશાચાદ્યાઃ વિદ્રવંતિ દિશો દશ |
પઠેદેતત્ત્રિકં નિત્યં ગુરોર્વૃંદાવનાંતિકે || ૪૭ ||
દીપં સંયોજ્ય વિદ્યાવાન સભાસુ વિજયી ભવેત |

રાજચોરમહાવ્યાઘ્રસર્પનક્રાદિપીડનાત || ૪૮ ||
કવચસ્ય પ્રભાવેણ ભયં તસ્ય ન જાયતે |
સોમસૂર્યોપરાગાદિકાલે વૃંદાવનાંતિકે || ૪૯ ||
કવચાદિત્રિકં પુણ્યમપ્પણાચાર્યદર્શિતમ |
જપેદ્યઃ સ ધનં પુત્રાન ભાર્યાં ચ સુમનોરમામ || ૫૦ ||
જ્ઞાનં ભક્તિં ચ વૈરાગ્યં ભુક્તિં મુક્તિં ચ શાતીમ |
સંપ્રાપ્ય મોદતે નિત્યં ગુરુવર્યપ્રસાદતઃ || ૫૧ ||
|| ઇતિ શ્રીમદપ્પણાચાર્યવિરચિતં શ્રીરાઘવેંદ્રકવચં સંપૂર્ણમ ||

www.yousigma.com